## ॥ सुदर्शनाष्टकम् ॥

1. प्रतिभट श्रेणि भीषण वर गुण स्तोम भूषण
जनि भय स्थान तारण जगदवस्थान कारण ।
निखिल दुष्कर्म कर्शन निगम सद्धर्म दर्शन
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥

2. शुभ जगद्रूप मण्डन सुर गण त्रास खण्डन
शत-मख ब्रह्म वन्दित शत-पथ ब्रह्म नन्दित ।
प्रथित विद्वत्सपक्षित भजदहिर्बुध्न्य लक्षित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥

3. स्फुट तटिज्जाल पिञ्जर पृथु-तर ज्वाल पञ्जर
परिगत प्रत्न विग्रह पटुतर प्रज्ञ दुर्ग्रह ।
प्रहरण ग्राम मण्डित परिजन त्राण पण्डित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥

4. निज पद प्रीत सद्गुण निरुपधि स्फीत षड्गुण
निगम निर्व्यूढ वैभव निज पर व्यूह वैभव ।
हरिहय द्वेषि दारण हर पुर प्लोष कारण
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥

5. दनुज विस्तार कर्तन जनि तमिस्रा विकर्तन
दनुज विद्या निकर्तन भजदविद्या निवर्तन ।
अमर दृष्ट स्व विक्रम समर जुष्ट भ्रमि क्रम
जय जय श्रीसुदर्शन जय जय श्री सुदर्शन ॥

6. प्रतिमुखालीढ बन्धुर पृथु महा हेति दन्तुर
विकट माया बहिष्कृत विविध माला परिष्कृत ।
पृथु महायन्त्र तन्त्रित दृढ दया तन्त्र यन्त्रित
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥

7. महितसंपत्सदक्षर विहितसंपत्षडक्षर
षडरचक्रप्रतिष्ठित सकलतत्त्वप्रतिष्ठित ।
विविधसंकल्पकल्पक विबुधसंकल्पकल्पक
जयजय श्रीसुदर्शन जयजय श्रीसुदर्शन ॥

8. भुवन नेतस्त्रयीमय सवन तेजस्त्रयीमय
निरवधि स्वादु चिन्मय निखिल शक्ते जगन्मय ।
अमित विश्व क्रियामय शमित विष्वग्भयामय
जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ॥

द्विचतुष्कमिदं प्रभूतसारं पठतां वेङ्कटनायकप्रणीतम् ।
विषमेऽपि मनोरथः प्रधावन् न विहन्येत रथाङ्गधुर्यगुप्तः ॥

|| sudarśanāṣṭakam ||

1. pratibhaṭa śreṇi bhīṣaṇa vara guṇa stoma bhuṣaṇa
jani bhaya sthana tāraṇa jagadavasthāna kāraṇa |
nikhila duṣkarma karśana nigama sadhdarma darśana
jaya jaya śrīsudarśana jaya jaya śrīsudarśana ||

2. śubha jagadrūpa maṇḍana sura gaṇa trāsa khaṇḍana
śata-makha brahma vandita śata-patha brahma nandita |
prathita vidvatsapakṣita bhajadahirbudhnya lakṣita
jaya jaya śrīsudarśana jaya jaya śrīsudarśana ||

3. sphuṭa taṭijjāla piñjara pṛthu-tara jvāla pañjara
parigata pratna vigraha paṭutara prajña durgraha |
praharaṇa grāma maṇḍita parijana trāṇa paṇḍita
jaya jaya śrīsudarśana jaya jaya śrīsudarśana ||

4. nija pada prīta sadguṇa nirupadhi sphīta ṣaḍguṇa
nigama nirvyūḍha vaibhava nija para vyūha vaibhava |
harihaya dveṣi dāraṇa hara pura ploṣa kāraṇa
jaya jaya śrīsudarśana jaya jaya śrīsudarśana ||

5. danuja vistāra kartana jani tamisrā vikartana
danuja vidyā nikartana bhajadavidyā nivartana |
amara dṛṣṭa sva vikrama samara juṣṭa bhrami krama
jaya jaya śrīsudarśana jaya jaya śrī sudarśana ||

6. pratimukhalīḍha bandhura pṛthu maha heti dantura
vikaṭa māyā bahiṣkṛta vividha mālā pariṣkṛta |
pṛthu mahāyantra tantrita dṛḍha dayā tantra yantrita
jaya jaya śrīsudarśana jaya jaya śrīsudarśana ||

7. mahitasampatsadakṣara vihitasampatṣaḍakṣara
ṣaḍaracakrapratiṣṭhita sakalatattvapratiṣṭhita |
vividhasaṅkalpakalpaka vibudhasaṅkalpakalpaka
jayajaya śrīsudarśana jayajaya śrīsudarśana ||

8. bhuvana netastrāyīmaya savana tejastrāyīmaya
niravadhi svādu cinmaya nikhila śakte jaganmaya |
amita viśva kriyāmaya śamita viṣvagbhayāmaya
jaya jaya śrīsudarśana jaya jaya śrīsudarśana ||

dvicatuṣkamidaṁ prabhutasāraṁ paṭhatāṁ veṅkaṭanāyakapraṇītam |
viṣame'pi manorathaḥ pradhāvan na vihanyeta rathāṅgadhuryaguptaḥ ||